# मानवस्य कर्तव्यवोधे श्रीमद्भगवद्गीतायाः प्रासङ्गिकता

गौर वेरा

**सारांशः -** साहित्यमेव मानवीयसंस्कृतेः सभ्यतायाः तथा व्यक्तित्वस्य अभिव्यक्तिः वर्तते । साहित्यस्य जीवनमूल्यैः सह शाश्वतसम्बन्धो वर्तते । साहित्ये जीवन-मूल्यं कल्पितं नास्ति , अधिकन्तु साहित्यकारस्य अनुभूतं सत्यमस्ति , यत् तस्य आत्मोपलब्धौ स्थापितं सत् स्वस्य सौन्दर्येण महत्तया तथा औदार्येण समाजेन जीवन-मूल्यरूपेण स्वीकृतं भवति । भारतीयसमाजे मूल्यानां प्रमुखवस्त्रोतो धर्मः । धर्मो मानवीयजीवनमूल्यं प्रति आस्थाम् उत्पादयति । मानवेषु बौद्धिक-आध्यात्मिक-नैतिक-चारित्रिक उदारतादि गुणानां विकासस्य समाहारपदमस्ति मानवतावादः इति । सत्यः-धर्मः-अहिंसा-कर्मः-अस्तेय-अकामः-अक्रोधः-अलोभः इत्यादयो मानवधर्मः । सत्य-दया-धर्म-क्षमा-शुचिता इत्यादीनाम् अवलम्वनेन मानवानां सार्विकः उन्नतिः भवति । त्यागेन भोगः विषयादि कर्म अवश्यमेव ग्रहणीयम् । कर्मविहीनाः मानवाः क्षणमपि न तिष्ठन्ति । अतः भगवता उक्तम् – "न हि कश्चित् क्षणमपि याचतु कर्मकृत्य तिष्ठति ।"(1) मानवस्य हृदि यावत्पर्यन्तं नैतिकतायाः विकासः न सम्भवति तावत् मानवतावादः इति विचारः पूर्णतां न एव प्राप्नोति ।

**कुञ्जीशब्दाः -** धर्मः – मानवता – कर्तव्यवोधः - कर्मयोगः – मूल्यवोधः

आचार-व्यवहार-इत्यादानां समन्बयेन मानविकमूल्यवोधः भवतीति तत्सर्वं धर्मशास्त्रात् शिक्ष्यते । यतः "आचारो परमो धर्मः"[(2)] – इति सिद्धान्तं सर्वोत्तमः मानविकमूल्यवोध इति धर्मशास्त्रकाराः उक्तवन्तः ।

कर्म एव मनुष्यस्य कर्त्तव्यम् । कर्मविमुखाः जनाः दुःखानि प्राप्नुवन्ति । कर्मणि निमग्नाः जनाः सुखेन जीवनं यापयितुं समर्थाः भवन्ति । मानवः सर्वदा सत्कर्मपरं भवति । येन कर्मणा मानसिकी आध्यात्मिकी च उन्नतिः स्यात् । सत्य-धर्म-शान्तिः-प्रेम-अहिंसा-एते वस्तुतः मानविकमूल्यवोधः भवन्ति ।

**संस्कृतवांङ्मये कर्मवादः -** वयं सर्वे समाजवद्धाः मानवाः । समाजस्य आचार-व्यवहारेन मूल्यवोधः वर्धितं जायते । धर्मशास्त्रे मानवाणां लौकिकव्यवहारः वर्णितमस्ति । धर्मः समाजस्य

नियन्त्राय एकं विशिष्टं साधनम् । आचारः-व्यवहारः-संस्कारः-इत्यादयः विषयाः धर्मशास्त्रे वर्णिताः सन्ति । “आचारो परमो धर्मः” इति सिद्धान्तं मानवीयमूल्यवोधे सर्वोत्तमः आसीत् । अधुना समाजे मानविकमूल्यवोधस्य ह्रासो भवति । मानविकमूल्यवोधाः विषयाः भवन्ति – सत्यम्-धर्मः-शान्तिः-प्रेम-अहिंसा इत्यादयः । “सत्यं वद , धर्मं चर” इति भारतीयानां मूलमन्त्रः भवति । अधुना समाजे पिता-पुत्रयोः,भ्राता-भ्रात्रोः पारिवारिकं कलहं हिंसां दृश्यते । एतत् किं मानवस्य स्वस्य धर्मः ? परन्तु मनुष्यः स्वस्य धर्मः यदि सम्यक् पालयिष्यति तदा मानवता परिस्फुटिष्यति ।

वस्तुतः जीवनस्य शाश्वतमूल्यं सत्यं शिवं सुन्दरम् इति त्रयस्य सामञ्जस्यपूर्णप्रतिष्ठायाः एव सफलतायाः पराकाष्ठा वर्तते । भारतीयसमाजे मूल्यानां प्रमुखस्त्रोतो धर्मः अस्ति । धर्मः मानवीयजीवनमूल्यं प्रति आस्थाम् उत्पादयति । आधुनिकसाहित्ये ‘मूल्य’ शब्दस्य प्रयोगः सामाजिक-आर्थिक-राजनैतिक-सांस्कृतिकस्तरेषु सम्पूर्णमानवव्यवहारस्य मानदण्डरुपेण भवति । मानवजीवनं सदाचार-सत्य-अहिंसादिनां समन्वयेन निर्मितम् ।

परन्तु वर्तमानकाले सर्वत्र मूल्यानां ह्रासः दृश्यते । समाजे सर्वत्र भष्टाचारं मानवमूल्यानां विच्छेदम् , जातिभाषा-धर्म-प्रान्तीयसमस्याभिः समाजे अन्तकलहप्रभृतयः जाता । एतदर्थं मानवमूल्यानां विकाशाय आचरण-नियमानां पालनं नितराम् आवश्यकम् अस्ति । मनुष्यः समाजस्य एकः सर्वश्रेष्ठः जीवो भवति । यतः मानवः सर्वश्रेष्ठः जीवः , अतः तस्य कृतकर्मणः प्रभावेन फलप्राप्तिः सुनिश्चिता । पुण्यकर्मसुखमूलं पापकर्मदुःखमूलं भवति ।

मनुष्यजीवनस्य लक्ष्यं भवति आत्मनः कल्याणसाधनम् । मनुष्यस्य धर्मो मानविकता । यदि वयं भारतीयसंस्कृतिं साहित्यं च पर्यालोचयामः तर्हि द्रक्ष्यामः संस्कृतसाहित्येऽपि मानवधर्मविषये वर्णितः अस्ति । मानवाणां हितकारी-वुद्धिः सद्भावना एव मानवता । अनेन कारणेन उच्यते - संस्कृतसाहित्यः भारतीयसंस्कृतेः धारकः वाहकः च । संस्कृतसाहित्ये मानविकता इति विषये नाना विषयाः वर्णिताः सन्ति । प्राच्य-प्राश्चात्य देशस्य विशेषतः भारतवर्षस्य साहित्ये गीतायाः कर्मयोगस्य कर्तव्यता विषये विभिन्नानि मतानि विद्यमानाः सन्ति । संस्कृतसाहित्ये समाजस्य हितभावना वर्तते । साहित्यमेव मानवीयसंस्कृतेः सभ्यतायाः तथा व्यक्तित्वस्य अभिव्यक्तिः वर्तते । साहित्यस्य जीवनमूल्यैः सह शाश्वतसम्वन्धो वर्त्तते ।

मानवजीवनः सदाचार-सत्य-अहिंसादिधर्मसम्पन्नाः । अस्य समाजस्य संस्कृति-समाजनीति-सभ्यता प्रभृतयः सम्पूर्णधर्मशास्त्रसम्भूताः भवन्ति । गीता ज्ञान-कर्म-भक्तिनां च त्रिवेणी सङ्गमं भवति । धर्मोदारता-कर्मे निष्कामता-साम्यवुद्धि-भगवत्कर्म-जीवसेवा-स्वधर्मपालनम्-

त्यागशीलतादि सार्वजनीनसार्वभौमश्च विषयाः वयं श्रीमद्भगवद्गीतायाः माध्यमेन शिक्षामः । यथोक्तम् –" सर्व धर्मान् परित्यज्य मामेकं शरणं व्रज ।"(3)

संस्कृतसाहित्यभाण्डारेषु भारतीयसमाजसंस्कृतेः यत् विषयाः वर्णिताः सन्ति तत् महाकाव्य-धर्मशास्त्रादि ग्रन्थे दृश्यन्ते । धर्म-अर्थ-काम-मोक्षाणां च चतुवर्गप्राप्तिरेव जीवनस्य मूललक्ष्यम् । श्रीमद्भगवद्गीता एक अमूल्यरत्नविशेषा भवति । ग्रन्थस्य महत्वं विषये उच्यते -

"सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः ।

पार्थो वत्सः सुधीभोक्ता दुग्धं गीतामृतं महत् ।।"(4)

एषा गीता मानवाणां जीवने सर्वेदुर्वलताः निराकरणाय सुस्पष्टं मार्गं दर्शयति । गीतायां परिव्याप्ताः निहितेषु तथ्येषु स्थितप्रज्ञस्य महत्त्वपूर्णं स्यानं वर्तते । स्थितप्रज्ञस्य स्वरूपं भगवान् कथयति –

प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान् ।

आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ।। (5)

अतः कथयितुं शक्यते यत् गीतायाः चिन्तनं सम्पूर्णमानवजातेः कृते अमृतकलशसदृशोऽस्ति , यस्य निरन्तरोपानेन मानवजातेः कल्याणं साधयति ।

सम्प्रति परिवारेषु गुरूजनान् प्रति श्रद्धा-भक्तिः नास्ति । समाजे स्नेह-भक्ति-प्रेम एते सर्वे लुप्तप्रायाः । परन्तु यदि एवं भवति तर्हि समाजः विनष्टं भविष्यति । अनेन कारणेन अस्माकं सर्वेषां गीतायाः अध्ययनम् अवश्यमेव प्रयोजनम् ।

कर्मयोगः विषये यथा गीतायां वर्णितम् अस्ति तथा दर्शनशास्त्रे अपि च व्याकरणशास्त्रेऽपि वर्णितम् अस्ति । दर्शनशास्त्रे कर्मस्य संज्ञायां उच्यते – "करोतेर्निखिलक्रियावाचकत्वात् कर्त्तुव्यापारैर्यत् साध्यते तदित्यर्थः।" अतः "क्रियावाप्यं कर्म"- व्याकरणशास्त्रे कर्मणः संज्ञायाम् उच्यते – "कर्तुरीप्सिततमं कर्म।" मानवस्य ईप्सिततमं कृत्यमेव कर्मः । परन्तु मानवस्य कृते ईप्सिततमं कर्मः किम् ? इति विषये गीतायां भगवान् श्रीकृष्णः उक्तवान् – शास्त्रविहितं कर्मः कर्तव्यकर्मः। वर्णाश्रमविहितं स्वभावजं कर्मः अपि कर्तव्यकर्मः । कर्मणा एव मनुष्याणां प्रतिष्ठां सम्पद्यते । भगवान् अर्जुनं प्रति उक्तम् –

"कर्मण्येव्याधिकारस्ये मा फलेषु कदाचन ।

मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ।।"(6)

कर्मणि केवलं मनुष्यानाम् अधिकारः । किन्तु शास्त्रनिषिद्ध कर्मानुष्ठानेन पापः भवति । अतः फलाकाङ्क्षां परित्यज्य कर्मयोगी शास्त्रविहितं कर्मः निरासक्तभावेन सम्पादयेत् ।

कर्मसम्पादनकाले कर्मणः साफल्यम् असाफल्यं वा न चिन्तनीयम् । अतः कर्मफलं प्रति आसक्तिं परित्यज्य स्वकर्तव्यसाधनं कर्मं अवश्यमेव प्रयोजनम् । अस्मिन् विषये गीतायाः तृतीयाध्याये उच्यते –

"तस्मात् असक्तः सततं कार्यं कर्म समाचर ।

असक्तो हि आचरन् कर्म परमाप्नोति पुरूषः ।।"(7)

विश्वसंसारःकर्मणा परिचालितः । जीवनधारनाय सर्वेषां मानवाणां कृते कर्मः अवश्यमेव कर्तव्यम् । ईशोपनिषदि अपि उक्तम् – "कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समा ।" किन्तु किञ्च कर्म करणीयम् ? 'आत्मनो मोक्षार्थं जगद्धिताय च ' – इति कर्मः सम्पादनीयम् । लोककल्याणस्य कर्मसम्पादनाय कर्मयोगिनां कृते आसक्तिः अवश्यमेव वर्जनीया । अतः आसक्तिं विहाय लोककल्याणसाधनार्थं कर्म अवश्यमेव उत्तमं भवति ।

भगवता कथितं यः मानवः सत्कार्यं कर्तुं समर्थः भवति , तस्य शान्तिः , समृद्धिः अपि च भवति । यथा गीतायां –

"श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात् ।

स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ।।"(8)

कोऽपि मानवः एक मुहूर्तं कर्मं न कृत्वा स्थातुं न पारयति । यदि मानवाः अहंकार-वासना-अभिलासादीनां त्यक्त्वा कर्मं कुर्वन्ति तर्हि तत् कर्मः विफलं न भविष्यति । अतः स्वार्थत्यगं कृत्वा आत्मसंयमेन कर्मः अवश्यमेव करणीयम् –

"कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।

इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते ।।"(9)

अतः मानवः कर्मं विना स्थातुं न शक्नोति , यतः प्रकृत्या उत्पन्नैः गुणैः सः विवशः भूत्वा कार्यं करोति । शरीरः सर्वदा निष्क्रियरूपम् अस्ति । आत्मानं विना शरीरस्य स्वस्य कार्यक्षमता नास्ति । आत्मानः कदापि विश्रामः नास्ति । मयायाः संस्पर्शेन सः आत्मा भौतिकगुणैः आकर्षितः सन् तान् गुणान् प्राप्नोति । अतः आत्मनः शुद्धीकरणार्थं शास्त्र द्वारा अदिष्टेषु कर्मसु तम् आत्मानं नियोजितं करणीयमेव । श्रीमद्भागवते कथितम् –

"त्यक्त्वा स्वधर्मं चरणाम्वुजं हरेर्भजन्नपक्वोऽथ पतेत्ततो यदि ।

यत्र क्व वाभद्रमभूदमुष्य किं को वार्थ आप्तोऽभजतां स्वधर्मतः ।।"(10)

आध्यात्मवादी मन्यते सर्वाणि कर्माणि त्यक्त्वा अन्येषामुपरि निर्भरः न कुर्यात् । कारणम् अस्मिन् जगति सर्वे मानवाः प्रकृत्याः उपरि प्रभूत्वं दर्शयितुं सचेष्टशिलाः भवन्ति । अतः तेषां

मनोष्कामना सर्वदा मलिना भवति , तेन सर्वदा जनाः कर्मं कुर्वन्ति । किन्तु कृष्णेन कथनम् अस्ति कर्मः तु अवश्यमेव करणीयमेव किन्तु तत् कर्मः निष्ठया सेवाभावनया मनसा करणीयम् । अतः कर्मः तु अवश्यमेव करणीयम् किन्तु तत् कर्म शुद्धवासनया भवेत् ।

सर्वे मानवाः तस्य जीवने मार्गदर्शनाय एकं मार्गदर्शकं अनुसरणं कुर्वन्ति । कारणम् तत् पन्थाः मानवजीवनस्य भविष्यत् कर्मदर्शनस्य उपयुक्तः मार्गः । मानवाः तेन मार्गदर्शकेन कर्मस्य उपयुक्तं लक्ष्ये गन्तुम् इच्छन्ति । यथा – जनकः एकः दिव्यपुरूषः आसीत् । कारणं तस्य कन्या सीता देवी आसीत् या मातालक्ष्याः स्वरूपः पुनश्च तस्य जामाता रामचन्द्रः आसीत् यः स्वयं भगवतः नारायणस्य अवतारः आसीत् । तथापि स वेदानुमोदितं कर्मं कर्तुं वाध्यः न आस्यीत् । सामान्यजनानां समक्षम् आदर्शं प्रस्तुयितुं सर्वानि नियतकर्माणि सः साधितवान् । कारणं सः मिथिलायाः राजा आसीत् । मानवाणां कृते कर्तव्यः निष्ठया कथं साधनीयम् इति अस्मिन् विषये शिक्षां दातुं स सर्वदा कर्मणि निरतः आसीत् । कर्मसाधनेन सर्वं सिद्ध्यति । राजर्षिः जनकः कर्मः कुर्वन्नेव सिद्धिं प्राप्तवान् । कर्म यदि न कुर्वन्ति तेषां कृते भोक्तुमपि अधिकारः नास्ति । अस्मासु प्रभुतं धनमस्ति , अतः अहं कर्म न करोमि , किन्तु कर्मकारैः कारयामि इति यदि चिन्तयामि तर्हिं तत्तु न उचितं भवेत् । अतः उच्यते – “लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसि ।”(11)

उपसंहारः - आधुनिकभारतवर्षे संकटमयाः समस्याः इदानीं दृश्यन्ते । मानवाः खलु क्रमशः हिंसापरायणाः सन् जीवनं यापयन्ति । कुत्रापि भक्ति-श्रद्धा-क्षमा-दयादयः मानवधर्मस्य प्रधानभूतचतुष्टयधर्माः ते विसर्जयन्ति इति दृश्यते । परन्तु गीता अस्माकम् आस्था , श्रद्धा भावनादीनां वर्णना चास्ति । गीता निष्पक्षरूपेण मानवतायाः ज्ञानं प्रददाति । गीतायाः समग्रेषु अध्यायेषु सत्ययुगतः कलियुगपर्यन्तं यावत् मनुष्याणां कर्म-धर्माणां ज्ञानं निहितम् अस्ति । गीतायाः वाणी मानवजातेः कर्तव्यान् अधिकाराञ्च वोधयति । सम्प्रति मनुष्यजीवने अहंकारभावः आगतः । अतः गीतायाः शिक्षा आधुनिकयुगे अत्यन्तावश्यकः अस्ति । गीतायाः शिक्षया मानवेषु अहं भावस्य समाप्तिः सम्भवति एवञ्च विचारः शुद्धी भवति ।

**पादटीका**

(1) श्रीमद्भगवद्गीता – ३/५

(2) मनुस्मृतिः – १/१०८

(3) श्रीमद्भगवद्गीता – १८/६६

(4) श्रीमद्भगवद्गीता माहात्म्यम् – ५

(5) श्रीमद्भगवद्गीता - २/५५

(6) श्रीमद्भगवद्गीता – २/४७

(7) श्रीमद्भगवद्गीता – ३/१६

(8) श्रीमद्भगवद्गीता – ३/३५

(9) श्रीमद्भगवद्गीता - ३/६

(10) श्रीमद्भगवद्गीता – ५/१७

(11) श्रीमद्भगवद्गीता - ३/२०

**सन्दर्भग्रन्थसूची :-**

1. श्रीमद्भगवद्गीता – जयदयाल गोयेन्दका , गीताप्रेस , गोरक्षपुर , 2014
2. श्रीमद्भगवद्गीता , श्रीयुक्त भूतनाथ सप्ततीर्थ , नवभारत पावलिशार्स , कलकाता
3. संस्कृत साहित्यस्य इतिहास – ड. देवकुमार दास , श्रीवलराम प्रकाशनी , कलकाता , 1419 वङ्गाब्द
4. धर्म शास्त्रस्य इतिहास – जनेश रञ्जन भट्टाचार्य , वि.एन.पावलिकेशन् , कलकाता , 2016
5. वेदान्तसार – विपदभञ्जन पाल , संस्कृत पुस्तक भाण्डार , कलकाता , 1415 वङ्गाब्द
6. स्वामी विवेकानन्देर वाणी ओ रचनाली ।
7. भारतीयदर्शन – ड. निरदवरण चक्रवर्ती , दत्त पावलिशार्स , कलकाता , 2010
8. संस्कृत रचनाञ्जलिः – ताराशङ्कर चक्रवर्त्ती , संस्कृत वुक डिपो , कलकाता , 2011
9. श्रीमद्भगवद्गीता यथारूप – A.C.Bhaktivedanta , अन्तराष्ट्रीय कृष्णभावनामृत संघ , हाइद्रावाद , 2012
10. श्रीमद्भगवद्गीता – श्रीमद् भजहरि दास वावाजी महाराज , तिथि प्रकाशन , उत्तरप्रदेश , 1420 वङ्गाब्द

*शोधच्छात्रः , प्रभातकुमारः महाविद्यालयः , विद्यासागरः विश्वविद्यालयः , मेदिनीपुरम्*